बाल० २० धिः श्रुतेनैव तु प्रत्ययेन धात्वर्थानुरक्तैव भावना विधीयते न शुद्धा शब्दांतरन्यायात् तत्र तस्युक्तं संबंधिनिरूप
५ णाधीननिरूपणः संबंधीवज्ञेयनिरूपणाधीननिरूपणं च ज्ञानमिवावच्छेदकधात्वर्थनिरूपणाधीननि
रूपणा भावनेति अतो या धात्वर्थं विना निरूपतमेवाशक्यास्ताषुतगं तर्हि विधिं विना शुद्धा प्रत्ययेनोक्तापि वि
धातुमशक्येति श्रुतेनैव विधिना धात्वर्थानुरक्ताया एव विधानान्न धात्वर्थरूपविशेषणविषयं विध्यंतरं क
ल्प्यत इति ॥ यहैकत्वाधिकरणन्यायसुधायामपि धात्वर्थावच्छिन्नैव भावना श्रुतविधिविषय इत्युक्तं ॥ ॥इति
विशिष्टविधिनिरूपणं ॥ ॥विशिष्टविधिष्वपि यत्र सोमेन यजेत सा दोत्रतीयांतेन द्रव्यादिविधिस्तत्र सो
मादिप्रातिपदिके सोमादिमान्यागो मत्वर्थलक्षणास्ति। तथा हि। सोमादिर्हि करणत्वेन श्रूयते करणं च
कारकत्वात्क्रियायैव संबध्यते नान्येन। क्रिया चात्र फलभावनैव प्रत्ययवाच्या न च तस्यां सोमादेः करणत्वं संभ २०
वति समानपदोपात्तधात्वर्थावरोधादिति भावार्थाधिकरणे स्थितं। न च धात्वर्थेनैव सोमादेः संबंधः संभव ५

© Dharmartha Trust J&K. Digitized by eGangotri

तितस्यधात्वनाप्तस्यार्थप्रतिकरणत्वेनोपादानात्क्रियारूपतयानवगमात्क्रियारूपत्वेवाधात्वर्थस्याप्तस्या
र्थप्रतिकरणत्वानुपपत्तेः। नचसत्यपिप्रत्ययवाच्यायाःफलभावनायाधात्वर्थावरोधेर्थासिद्धधात्वर्थभा
वनयासोमादेःसंबंधइतिवाच्यं।तस्याइहाश्रुतत्वात्त्र्यश्रुतयाचतयाशब्दांतरस्यान्वयायोगात्।फलभा
वनात्वत्रश्रुतानधात्वर्थभावना।नचाध्याहृतस्यधात्वर्थभावनांतयासोमादेरन्वयःसोमेनभावयमानेनया
गेनेष्टंभावयेदितिविनाप्यध्याहारेणवाक्यसमन्वयोपपत्तेः।नटव— यदत्रप्रत्ययार्थकरणंयागस्तत्रैवतृ
तीयांतेनसोमादिपदेनवर्त्तितव्यंनाम्नागतिरस्तिनत्रात्संतनिरूढत्वेनसोमादिपदस्यसामानाधिकरण्य
मात्रेणनामत्वासंभवादर्थांतरवाचिनःसोमादिपदस्यार्थांतरेयागटत्रिमर्त्वर्थलक्षणायांगीक्रियतेइ
तिसेयंमत्वर्थलक्षणाविशिष्टविधावेवेतिचेत्ं यतःप्रतिमालितउद्भिदधिकरणवार्तिकेहिकर्मगुणवि
धिःफलेगुणविधिर्विशिष्टविधिरूपेणावेतेविकल्प्यात्रिधापिपक्षेषपंचपंचदोषाउक्ताः।तत्रतृतीयपक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

बाल॰ त॰ एवमत्वर्थलक्षणादोषउक्तोनेतरयोः। शास्त्रदीपिकायामपि। विशिष्टविधिपक्षेच भवेन्मत्वर्थलक्षणे
६ ति। तेन दध्नेंद्रियकामस्य जुहुयादित्यादिगुणफलसंबंधेषु यथा धात्वर्थो विधानान्मत्वर्थलक्षणा
भिमता एवं व्रीहिभिर्यजेतेति कर्मणि गुणविधावपीति केचिदेवमेव सिद्धांतं वर्णयंति॥ ननु च धात्वर्थ
स्य करणत्वावगतिर्मत्वर्थलक्षणायां वाजं तत्करणत्वं च न शब्दाभिहितमस्ति किंतु लाक्षणिकं भावना
याश्च करणाकांक्षया तल्लक्षणायज्ञौ स्यात्करणाकांक्षा च विधेयाया भावनायाः स्यान्नानूद्यमाना
याः सोयं भावार्थाधिकरणन्यायः। तेन व्रीहिभिर्यजेतेत्यादौ भावनानुवादान्न करणाकांक्षास्तीति न धातु
ना धात्वर्थः करणत्वेनोच्यते किंतु कर्मत्वेनैव भावार्थाधिकरणन्यायप्रवृत्तेः धात्वर्थकर्मिकायां च भावना
यं व्रीह्यादेः करणत्वेनैवान्वयोपपत्तेः इति न मत्वर्थलक्षणेति॥ तदयुक्तं। धात्वर्थस्य हि करणत्वावगतिर्म राम॰
त्वर्थलक्षणायां बीजमित्युपपादितमेवाभ्युपेतं च त्वयापि। व्रीहिभिर्यजेतेत्यादौ च यद्यपि न भावार्थाधि ६

© Dharmartha Trust J&K. Digitized by eGangotri

करणन्यायाद्धात्वर्थस्य करणत्वं सिध्यति तथापि नवमाद्यन्यायेन यागस्वरूपे व्रीहिविधिरनर्थक इति
साधनांशे गुणं विधातुमवश्यं धात्वर्थः करणत्वेनानुवदितव्यो लक्षणायेति गुणविधावपि सिद्धा मत्वर्थल
क्षणा। तदुक्तं। विधाने वानुवादे वा यागः करणमिष्यत इति। विशिष्टविधावेव तु मत्वर्थलक्षणोक्तिर्भावार्था
धिकरणन्यायेनातिसुलभत्वात्कलेपि ज्ञेयं॥ ॥इति मत्वर्थलक्षणा॥ ॥अनुपादेयानि पंचैव प्रकरणां
तराधिकरणपर्यालोचनया प्रतिभाति। द्वित्वबहुत्वयुक्तं वा चोदनागतस्ये सधिकरणे तु यजमानस्यात्मी
यमेकत्वमप्यनुपादेयमित्युक्तं तत्राशंकितांगसागन्यायाप्रवृत्तेः। तदुक्तं पार्थसारथिमिश्रैः अनु
पादेयमेकत्वं यजमानस्य कालवदिति। अत्र यजमानस्येति यागाद्येकत्वमाहृत्यै। एकत्वमिति यजमा
नद्वित्वबहुत्वव्यावृत्त्यै। उभयस्थाने संख्येसनक्तिरूपसद्वारद्रव्यव्यावृत्तौ एवं ब्राह्मणपादिजातिरप्य
नुपादेयैव। तदुक्तं द्वितीये आधानाधिकरणे सोमेश्वरेण स्वविधिप्रयुक्तत्वे तु ब्राह्मणत्वादेः कर्तृवि

© Dharmartha Trust J&K. Digitized by eGangotri

वाल॰ त्र॰ ७

शेषणत्वेपि जातेरनुपादेयत्वादिति जातेरर्थादधिकारिविशेषणत्वावगतेः सिद्धत्वेन च कामनयाधि
कारिविशेषणत्वायोगादाधानस्य च फलाश्रवणे न राजसूयवन्निमित्तान्वयाविरोधान्निमित्तत्वम
तीतेरिति च। ननु किमिदमनुपादेयत्वं। उच्यते। कृतिव्याप्यत्वमुपादेयत्वं तदव्याप्यत्वं चानुपादेयत्वं
यथा च देशादिपंचकं कृत्यसाध्यं भवत्येवं यजमानस्यात्मायमेकत्वब्राह्मणत्वादिजातिश्च स्वभावसि
द्धत्वादेव कृत्यसाध्यं। नन्वेवं पशुत्वादिजातिः पश्वेकत्वाद्यपि वानुपादेयं स्यात्। न तयोः पशुव्य
क्तिद्वारा कृतिव्याप्यत्वेनोपादेयत्वात्। यजमानपक्षे तु स्वकृत्यसाध्यत्वात्तद्द्वारापि न तदीयैकत्वजा
त्यादि तत्कृतिव्याप्यमित्यनुपादेयमेव। आहवनीयविषययोस्तु कृतिव्याप्यत्वेनोपादेययोरपि सतोर्वि
ध्यंतरसिद्धयोरेवोपादानात्प्रयोगविध्यनुष्ठाप्यत्वमात्रेण यथाऽऽरुण्याविषयत्वं। अत एव वहा एम ७
हवनीये जुहोतीत्यस्यानुपादेयसंबंधसचिवोऽसंनिधिप्रकरणांतरमित्येतन्न्यायाविषयत्वेप्युक्तं।

© Dharmartha Trust J&K. Digitized by eGangotri

ननुयजमानस्यात्मीयमेकत्वंब्राह्मणादिजातिश्चानुपादेयाचेत्तत्संबंधसत्वेनाप्यसंनिधिनाप्रकर
णांतरत्वाद्भेदः स्यात्।तत्राद्योदाहरणंयदाहवनीयेजुहोतीत्येव।जात्युदाहरणमपिस्रग्यमितिचेत्।न
6 रूपालाभात्।जुहोतिर्हिसाधारणेनकंचिद्धोमविशेषंनियमेनोपस्थापयतियदीयेतिकर्तव्यतातिदि
श्येत। अतएवदर्विहोमाअपूर्वाइत्युक्तमष्टमे।उपदेशस्तुनात्स्येव।अनारभ्याधीतेतुब्राह्मणोयजे
तेत्यादिश्रवणेविश्वजितायजेतेत्यादिवदस्वक्रचोदितत्वेनातिदेशतोरूपलाभसंभवात्प्रकरणांतरव
तःकर्मभेदइष्टएव।अतोनपंचैवोनुपादेयाभातिनियमइतिसिद्धं॥ ॥इत्यनुपादेयनिरूपणं॥ ॥

मीमांसा बालप्रकाश

© Dharmartha Trust J&K. Digitized by eGangotri

बाल०का०
८

रा०
८

© Dharmartha Trust J&K. Digitized by eGangotri